National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(68): 165-168
© 2026 NJHSR
www.sanskritarticle.com

Dr. Satish
Sanskrit Junior Lecturer,
Government college Bhel,
Hyderabad

Correspondence:
Dr. Satish
Sanskrit Junior Lecturer,
Government college Bhel,
Hyderabad

काव्यशास्त्रविदां रसविषयकचिन्तनम्

Dr. Satish

संस्कृतकाव्यशास्त्रेषु रससिद्धान्तस्य प्रतिपादकेन आचार्यभरतमुनिना रसभाव-संज्ञादीनां प्रयोगः स्वपूर्ववर्तिनाम् आचार्याणामाधारेण प्राप्तेषु "आप्तार्थे कृतम्" इति।[1] तेनैव सह रसस्वरूपस्य अत्यन्तं संक्षिप्तं प्रतिपादनमपि अकरोत्, येन कारणेन परवर्ती-आचार्यैः रसस्वरूपस्य विविधरूपेण व्याख्याः कृताः। संस्कृतकाव्यशास्त्रेषु रसस्य सामान्यरूपेण त्रिविधरूपाणां प्रतिपादनं क्रियते-

(1) पदार्थवाचकरूपेण रसशब्दः

(2) सुखदुःखात्मकभाव -द्योतकरूपेण रसशब्दः

(3) काव्यास्वादजनित-आनन्दानुभूत्यात्मकः रस शब्दः।

एषां त्रिविधरूपाणां प्रतिपादनमधः प्रस्तूयते

(1) पदार्थवाचकरूपेण रस शब्दः

सर्वप्रथमं भरतमुनिरेव रसनिष्पत्तेः, रसास्वादस्य च प्रक्रियाः पृथग्रूपेण वर्णिताः आचार्यभरतानुसारेण-

""**विभावानुभाव-व्यभिचारिभाव-संयोगाद्रसनिष्यत्तिः"-** ना.शा.- 6/31

एवंविधरूपेण रसनिष्पत्तिः भवति। यस्य स्पष्टीकरणं व्यावहारिकदृष्टान्तेनापि क्रियते-आचार्येण- "यथा हि नानाव्यञ्जनौषधिद्रव्यसंयोगाद्रसनिष्पत्तिः, तथा

नानाभावोपगमाद् रसनिष्पत्तिः। यथा हि गुडादिभिरद्रव्येव्यजनैरोषधीभिश्च षाडवादयो (षड्रसा) रसा निर्वर्त्यन्ते, एवं नानाभावोपहिता अपि स्थायिनो भावा रसत्वमाप्नुवन्ति-

(ना.शा. 6/31-गद्यभागे)

प्रस्तुतस्याः रसनिष्पत्तिप्रक्रियायाः अपि स्पष्टरूपेण भागद्वयं निर्मीयते-

(क) अनेकषां भावानां उपगम-समन्वयः अथवा संयोगः एव रसनिष्पत्तिः

(ख) नानाभावसमन्वयेन स्थायिभावाः एव रसत्वमाप्नुवन्ति इति।

उपर्युक्तविवरणेन रसनिष्पत्तेः प्रक्रिया तु सुस्पष्टाऽभवत्, कि तु नाट्यरसः पदार्थरूपेण किम् इति? इत्यत्र भरतमुनिरेव समादधति- "* आस्वाद्यत्वात्" अर्थात् आस्वाद्यरूपेण यः पदार्थो विद्यमानोऽस्ति स एव रसः। रसोऽयं कथमास्वाद्यते इत्यत्रापि उदाहरणरूपेण स्पष्टीकरोति- "यथाहि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना

रसानास्वादयन्ति सुमनसः पुरुषाः हर्षादींश्चाधिगच्छन्ति, तथा नानाभावाभिनयव्यंजितान्

वागङ्गसत्त्वोपेतान् स्थायिभावानास्वादयन्ति सुमनसः प्रेक्षकाः हर्षादींश्चाधिगच्छन्ति "-

(ना. शा. 6/31-गद्य भागे)

इत्थं स्पष्टीकुर्वन् स्वमतपुष्ट्यर्थं द्वावानुवंश्यश्लोकौ अपि प्रदत्तौ-

(क) यथा बहुद्रव्ययुतैर्व्यञ्जनैर्बहुभिर्युतम्।

आस्वादयन्ति भुञ्जाना भक्तं भक्तविदो जनाः।

(ख) भावाभिनयसंबद्धान्स्थायिभावांस्तथा बुधाः।

आस्वादयन्ति मनसा तस्मान्नाट्यरसाः स्मृताः।। (ना.शा. 6/32-33)

अत्र भरतमुनेः-" मनसा आस्वादयन्ति" इति प्रयोगः अतिमहत्त्वपूर्णः, यतो हि कवेरन्तर्गतभावान् प्रेक्षकाः विभावानुभावव्यभिचारिभावानां माध्यमेनैव स्वमनसा आस्वादयन्तीति।

अत्र " आस्वाद्यत्वम्" इत्यनेन आस्वादः इत्यर्थः नास्ति, किं तु यस्य आस्वादः क्रियते सः पदार्थः। यदि आस्वादः इत्यर्थः भवेत् चेत् भरतमुनिः * आस्वाद्यत्वात्'* इति स्थाने "आस्वादात्" इति प्रयोगं कुर्यात्, किं तु न तथाऽकरोत्। "अतः रस इति कः पदार्थः उच्यते- "आस्वाद्यत्वात्" इत्यनेन सूत्रेण पदार्थोऽयं आस्वाद्यपदार्थः एव।

विभावानुभावव्यभिचारिभावानां साहाय्येनैव हृदयस्थभावाः साकाराः भवन्ति, एवंविधभावानेव भरतमुनिना रस इति उच्यते। नाट्यशास्त्रस्य सप्तमाध्याये भावद्योतकः एकः श्लोकः समुपलभ्यते, येन स्पष्टीभवति यत् हृदयस्थभावाः (स्थायिभावाः) एव रसरूपेण परिणताः इति-

विभावानुभावयुतो ह्यंगवस्तुसमाश्रयः।

संचारीभिस्तुसंयुक्तः स्थाय्येव तु रसो भवेत्॥

विभावानुभावव्यभिचारीपरिवृत्तः स्थायीभावो रस नाम लभते [2]

आचार्याभिनवगुप्तेनापि स्वीक्रियते यत् नाटये या बाह्यसामग्री प्रदश्यते सैव रसः, सुखदुःखरूपता च तस्य स्वभावः एव[3]

अभिनवगुप्तानुसारेण रसप्रतीतेः स्वरूपम् इत्थं भवति- 'रसनिष्पत्तौ विभावाः बीजाङ्कुररूपेण भवन्ति, अनुभावाः व्यभिचारीभावाश्च तस्मिन् अङ्कुरे संस्कारोत्पत्तिं कुर्वन्ति, एभिः- त्रिभिरेव सामग्रीविशेषैः सुखदुःखात्मकरूपाः आन्तरिकस्थायिभावाः उत्पद्यन्ते, ये सुखदुःखरूपाः भवन्ति, अतः सः सुखदुःखात्मकविषयः बाह्यविषयसामग्र्याम् एव स्थितोऽस्ति, यतो हि सुखदुःखरूपता तु बाह्यविषयाणां स्वभावः एव। एवं प्रकारेण रसस्य स्वरूपः अथवा अर्थोऽभूत्-

"विभावानु भावव्यभिचारिभावानां सामग्री। आचार्यभरतेन शृङ्गारस्य परिभाषा

विषयसामग्रीरूपेणेव कृता-

सुखप्रायेषु सम्पन्नः ऋतुमाल्यादि सेवकः।

पुरुषः प्रमदायुक्तः शृङ्गार इति संज्ञितः॥ (ना.शा. 6/46)

एवंविधरूपेण भरतमुनिः नाट्यरसस्य स्वरूपम् आयुर्वेदादीनां वस्तुरूप-पदार्थरूपरससमेव निर्धारणाय प्रयत्नमकरोत्। भरतमुनेः पूर्वं मूलभूतरूपेण रसस्य स्वरूपं विषयसामग्रीरूपेण कः अकरोत् इति निर्धारणाय न कोऽपि ग्रन्थः उपलभ्यते, किं तु अभिनवभारत्यां केचन प्रमाणाः समुपलभ्यन्ते येन ज्ञायते यत् केचन आचार्याः रंगमंचे प्रस्तुतीकृताः बाह्यविषयसामग्रीः एव "रसः" इति स्वीकुर्वन्ति स्म।

2. सुख-दुःखात्मकरूपो रसः

उपर्युक्त विवरणानुसारेण ज्ञायते यत् सांख्यमतानुयायिनः आचार्यभरतनिरूपित-' रसतत्त्वं विषयसामग्रीरूपेण स्वीकुर्वन्ति तथा च तस्य मूले निहित सुखदुःखात्मकभावानामस्तित्वस्यापि समर्थनं कुर्वन्ति। आचार्याभिनवगुप्तात् पूर्ववर्तिनः आचार्याः "रसतत्त्वं सुख-दुःखात्मकभाव रूपेण समुपस्थापितवन्तः।

भरतमुनेः रससूत्रस्य संक्षिप्ततया अनेकं आचार्याः रसतत्त्वस्य विभिन्नैः रूपैः प्रतिपादनं कृतवन्तः। नाट्यरसं पदार्थरूपेण स्वीकृत्य यदा तस्य विभिन्नतत्त्वानां, विश्लेषणं क्रियते, तदा तस्मिन् (रसे) स्थूलतत्त्वानां, मूर्ततत्त्वानां सूक्ष्ममनोभावानां च प्राप्तिर्भवति। विभावाः वाचिकाङ्गिकसात्त्विकाभिनयाश्च स्थूलतत्त्वानि मूर्ततत्त्वानि च उपकरणानि सन्ति, अन्ये च व्यभिचारिभावाः, स्थायिभावाश्च सूक्ष्ममनोभावोपकरणानि सन्ति। नाट्यं तु मूर्तरूपम् अभिनयात्मकं भवति, अतः आरम्भे रसतत्त्वस्य मूर्तरूपमेव प्राधान्येन स्वीक्रियते स्म, कि तु भरतमुनिः रसस्वरूपं वर्णयन् सूक्ष्ममनोभावरूपान् स्थायिभावानेव रसत्वरूपेण विवेचयति- "स्थायिभावान् रसत्वमुपनेष्यामः" (ना.शा.6/45 गद्य भागे)

भरतमुनिना निरूपिताः स्थायिभावाः तेषां स्वरूपं च निस्सन्दिग्धरूपेण मनोभावात्मकाः एव, यथा रतिस्थायिभावस्य व्याख्यायां 'रतिरामोदात्मको भावः" (ना.शा. 7/8)

इति उक्ततथ्यस्य पूर्णसमर्थनं क्रियते।

भरतमुनिना निरूपिताः अष्टौ स्थायिभावाः- न सर्वे सुखात्मकाः अपितु केचन सुखात्मकाः केचन दुःखात्मकाश्च। भरतमुनिः रसस्वरूपप्रतिपादने "'हर्षादींश्चाधिगच्छन्ति'" इत्युक्त्वा केवलं हर्षादिप्राप्तेः समर्थनं नाऽकरोत् अपितु दुःखात्मकभावानपि दृष्टिपथे संस्थाप्य आदर्शप्रेक्षकं मनसि निधाय प्रमाणीकरोति-

यस्तुष्टौ तुष्टिमायाति, शोके शोकमुपेति च।

दैन्ये दीनत्वमभ्येति स नाट्ये प्रेक्षकः स्मृतः॥ (ना.शा. 27/52)

अतएव तत्परवर्तिनः अनेके आचार्याः रसस्य वस्तुनिष्ठतां किञ्चिन्मात्रमेव प्रस्तूय सुख- दुःखात्मकभावस्वरूपमेव प्रतिपादित-वन्तः। रसतत्त्वम् आनन्दस्वरूपमिति मन्यमानाः आनन्दवर्धनाचार्य-अभिनवगुप्ताचार्यादीनां परम्परा पश्चात् समृद्धिमुपगता, किं तु तत्पूर्ववर्तिनः आचार्याः "रसतत्त्वम्" सुखदुःखात्मकरूपेणैव स्वीकुर्वन्ति

स्म, यथा- भामहः, दण्डी, वामनः, लोल्लटः, श्रीशङ्कुकः, भोजः, रामचन्द्र गुणचन्द्राश्च।[4]

एते आचार्याः विभावानुभावव्यभिचारिभावैः परिपुष्टस्य स्थायिभावस्यैव समर्थनं कृतवन्तः, न तु सहृदयचर्वणाजन्यस्य आनन्दरूपात्मकस्य रसस्य।

आचार्यभामहस्य दण्डिनश्च प्रतिपाद्यं काव्यं न तु नाट्यम्, किं तु उभावपि काव्येषु रसस्थितिं समर्थितवन्तौ।[5] दण्डी स्वीय "काव्यादर्शे" वाणीषु- वस्तुविशेषे च रसस्थितिम् अङ्गीकरोति ।[6] आचार्यवामनस्तु काव्यालङ्कारसूत्रवृत्तौ नाट्यस्य, करुणरसस्य, सुख-दुःखात्मकभावानां "' संप्लवस्य " निदर्शनमपि करोति-

"करुणप्रक्षणीयेषु संप्लवः सुखदुःखयोः।
यथानुभवसिद्धस्तथेवोजः प्रसादयोः॥"

(हिन्दी काव्यालङ्कारसूत्रवृत्तिः पृ. 122)

इत्थं वामनोऽपि सुखदुःखात्मक भावस्वरूपस्य रसस्य समर्थकः इति सिद्ध्यति। अभिनवभारत्यामुद्धृतविचारानुसारेण तत्पूर्ववर्ति-आचार्याणां भट्टलोल्लट-श्रीशङ्कुकादिमताभिप्रायेणच एतत्सिद्ध्यति यत् एते आचार्याः अपि सुख-दुःखात्मकस्थायिभावानां परिपुष्टरूपमेव ""रसः" इति स्वीकुर्वन्ति स्म। नरेन्द्र-भोजः तु "रसतत्त्वम्" सुख-दुःखात्मकरूपमेव निर्धारयति -

""रसा हि सुखदुःखावस्थानुरूपाः ते च शरीरिणां चैतन्यवतां न काव्यस्य"[7]

डॉ. राघवन् इत्येतस्य तु अभिप्रायेण नरेन्द्र भोजः लौकिकभावानां कृते एव "रस" शब्दस्य प्रयोगमकरोत्।[8] भरतमुनिरपि नाटके लौकिकसुखदुःखावस्थानुरूपं चित्रणमेव मुख्यरूपेणाकरोत् ।

अवस्था याहि लोकस्य सुख-दुःखसमुद्भवा।
नानापुरूषसंचारा नाटके संभवेद् इह॥ (ना.शा. 19/221)

नाट्यदर्पणे तु सुख-दुःखात्मकरसस्वरूपस्य एकान्तप्रतिपादनमभवत्। तत्र नवरसाः द्विविधरूपेण विभक्ताः (1) इष्टविभावात्मकाः (2) अनिष्टविभावात्मकाश्च

इष्टविभावात्मकेषु- शृङ्गार-हास्य-वीर-अद्भुत-शान्ताः'

अनिष्ट विभावात्मकेषु-करुण-रौद्र-वीभत्स- भयानकाः परिगणिताः, इत्यत्र इष्टविभावात्मकाः- सुखात्मकाः, अनिष्टविभावात्मकाश्च-दुःखात्मकाः इति।

3. काव्यास्वादजनित-आनन्दानुभूत्यात्मकः रसः

भरतमुनेरेव रसप्रतिपादने "रसः - आस्वाद्यः, आनन्दरूपः, इत्यंशाः अपि प्राप्यन्ते। आनन्दवादी-आचार्याः रसस्य आनन्दस्वरूपनिर्धरणे रसास्वादप्रक्रियामेव आधाररूपेण गृहीतवन्तः। भरतमुनिः रसप्र-क्रियायां सुमनसप्रक्षकानेव स्थायिभावानामास्वादकाः इत्यकथयत्, यस्य च स्थायिभावस्य ते आनन्दानुभूतिं कुर्वन्ति तस्य द्वौ विशिष्टरूपावपि प्रदर्शितौ-

तत्र प्रथमः- "'नानाभिनयव्यञ्जितान्"

द्वितीयश्च- ""वागङ्गसत्त्वोपेतान् '।

रसतत्त्वं नाट्यवस्तुरूपेण स्वीकुर्वन्त: आचार्याः अभिनययुक्तमूर्त-स्थायिभावानेव "रस" संज्ञया अभिधीयन्ते। किं तु अनेन मूर्त्तरूपेण सह स्थायिभावस्य अमूर्तरूपस्य भरतमुनिः "व्यंजना" इति नामधेयं प्रथमं प्रकाशितवान्। अर्थात् आस्वादक्षणेषु प्रेक्षकः अभिनयादिभिः व्यञ्जितः स्थायिभावस्यास्वादनं करोति, अतः व्यञ्जनया सहृदये स्थायिभावस्य स्थितिः प्रकटीभवति आचार्याभिनवः रसतत्त्वं सहृदयस्थ स्थायिभावरूपे निश्चयीकरोति। तस्य स्वरूपश्च आनन्दानु-भूत्यात्मकरूपेण निर्धारयति। आचार्याभिनवः प्रत्यभिज्ञानदर्शन-स्यानुयायी आनन्दवादी दार्शनिकः आसीत्। अतएव रसतत्त्वस्य आनन्दात्मकसिद्धयर्थं तद्दर्शनप्रभावितोऽयं (अभिनवगुप्तः)

नवीनयुक्तीनाम् आश्रयोऽपि नयति-

- "रसः मूलरूपेण एकः एव", इत्येतस्याः धारणायाः समर्थने "न रसादृते कश्चिदर्थः प्रवर्तते" इत्येतामुक्तिं प्रमाणरूपेण उपस्थापयन् रसस्य एकवचने प्रयोगमकरोत्'।[9]
- "रस: सहृदयसंवेदनात्मकः निर्विघ्नविश्रान्तिरूपेऽस्ति।[10] अस्य विचारस्य बीजरूपः डॉ. नगेन्द्रानुसारेण भरतमुनेः श्लोकेऽस्मिन् विद्यते-

दुःखार्त्तानां श्रमार्त्तानां शोकार्त्तानां तपस्विनाम्।
विश्रान्तिजननं काले नाट्यमेतन्मयाकृतम्॥। (नाशा. 1-114)

"रसःस्थायीविलक्षणो अलौकिकश्च वर्तते,चर्व्यमाणतैकप्राणश्चास्ति ।[11]

- स्वसंवित् चर्वणा, अखण्डः, प्रकाशमयश्च भवतीति कारणात् आनन्दानुभूत्यैव अस्य (रसस्य) सारभूत-तत्त्वः।[12]

अस्मिनैव वर्गे अन्तिम: अत्यन्तसमर्थश्चाचार्यः पण्डितराज-जगन्नाथोऽपि काव्यरसस्य आनन्दानुभूतिप्रमाणे छान्दोग्योपनिषदः उद्धरणमेकं प्रमाणरूपेण स्वीकृत्य "रसः" आत्मानन्दतुल्यः इति समुद्घोषितवान्-

अस्त्यत्रापि रसो वै सः।
रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति-

(रसगंगाधर चौ. सं. सी. प्रथमानने पृष्ठ-91)

अर्थात् स आत्मा रसस्वरूपः रसं लब्ध्वैवानन्दरूपो भवतीति। इत्यनेन एतद् स्पष्टीभवति यत् पूर्वोक्तौ उभौ अपि रसस्वरूपौ-(नाट्यवस्तुरूपः, सुख-दुःखात्मकरूपश्च) ध्वनिवादी आचार्याभिनव-गुप्तनिरूपितरसस्वरूपेण पर्याप्तौ भिन्नौ स्तः। रसतत्त्वस्य प्रतिपादनं ये केवलं विषयसामग्रीरूपेण अकुर्वन् तेषां धारणा भ्रान्तिपूर्णा इति खण्डितवान् आचार्याभिनवगुप्तः।[13] तेनैव सह स्थायीविलक्षणतां प्रबलरूपेण समर्थयन् रसस्य सुख दुःखात्मकरूपतामपि मान्यतारहितं तमकरोत्।

सन्दर्भ ग्रन्थः

[1]एते अष्टौ रसाः प्रोक्ताः द्रुहिणेन महात्मना—रसानां भावानां च नाट्याश्रितानां चार्थानामाचारोत्पन्नान्यासोपदेशसिद्धानि नामानि भवन्ति। (ना.शा. 6/16)

[2]ना.शा. द्वितीय संस्करण—1956, ओ.ई. बड़ौदा, पृष्ठ 379 ।

[3]ना.शा. 7/7, गद्य भागे।

[4]भारतीय साहित्यशास्त्र, श्री ग. त्र्यं. देशपाण्डे, पृष्ठ 291

[5]भामहः काव्यालङ्कारः 1/18

[6]मधुरं रसवद्वाचि वस्तून्यपि रसस्थितिः। काव्यादर्श 1/51

[7]शृङ्गारप्रकाश, द्वितीय संस्करण, पृष्ठ 369

[8]NUMBER OF RASAAS, पृष्ठ 155– 156; एवं BHOJA'S ŚṚṄGĀRAPRAKĀŚA, डॉ. राघवन्, पृष्ठ 433।

[9]NUMBER OF RASAAS, पृष्ठ 176 उद्धृत—"एक एव तावत् परमार्थतो रसः सूत्रस्थानत्वेन रूपके प्रतिभाति।"
(अभि. भा. प्र. 1, पृष्ठ 273)

[10]तत एव निर्विघ्नस्वसंवेदात्मकविश्रान्तिलक्षणेन।"
(अभि. भा. 1, गायकवाड ओरिएण्टल सीरीज, पृष्ठ 269)

[11]रससिद्धान्त, पृष्ठ 17– 18

[12]"अलौकिकनिर्विघ्नसंवेदनात्मकचर्वणागोचरतानितोऽर्थश्चर्व्यमाणतैक सारो न तु सिद्धस्वभावतः।" (अभि. भा. प्र. सं., पृष्ठ 483)

[13]"येन त्वभिधायि सुख-दुःखजननशक्तियुक्ता विषयसामग्री बाह्यैव।"
(अभि. भा. प्र. सं., पृष्ठ 461)